# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ५** | **गुणाः – ५०** |
| **विषयः – पुराणेतिहासः** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १७/०७/२०२१** | **सन्दर्भग्रन्थः – विष्णुपुराणम् ४,५,६ अंशाः** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ वर्णधर्मास्तथाख्याता धर्मा ये चाश्रमेषु च।
श्रोतुमिच्छाम्यहं वंशं राज्ञां तद् ब्रूहि मे गुरो॥

२ जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः।
धनाशा जीविताशा च जीर्यतोऽपि न जीर्यतः॥

३ न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते॥

४ यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते।
यत्रावतीर्णं कृष्णाख्यं परं ब्रह्म निराकृति॥

**प्रश्नः २** इक्ष्वाकुवंशवर्णनं सौभरिचरित्रं च निरूपयत।

**प्रश्नः ३** वसुदेव-देवक्योः विवाहं वर्णयत।

**प्रश्नः ४** कलियुगधर्मान् यथाग्रन्थं निरूपयत।

**प्रश्नः ५** श्रीरामचरित्रं यथाग्रन्थम् उपपादयत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ यामेतां वहसे मूढ सह भर्त्रा रथे स्थिताम्।
अस्यास्तवाष्टमो गर्भः प्राणानपहरिष्यति॥

२ प्रसीद देवि सर्वस्य जगतश्शं शुभे कुरु।
प्रीत्या तं धारयेशानं धृतं येनाखिलं जगत्॥

३ इति कृत्वा मतिं कृष्णो गोवर्धनमहीधरम् ।
उत्पाट्यैककरेणैव धारयामास लीलया ॥
४ भारावतारणार्थाय पृथिव्याः पृथिवीतले ।
अवतीर्णोऽखिलाधार त्वमेव परमेश्वर ॥

**प्रश्नः ७** भगवता गोपीभिः सह कृतां रासलीलां वर्णयत ।

**प्रश्नः ८** श्रीकृष्णमानेतुम् अक्रूरस्य गोकुलगमनं समीक्षत ।

**प्रश्नः ९** श्रीकृष्ण-बाणासुरयोर्युद्धं वर्णयत ।

**प्रश्नः १०** परीक्षितः राज्याभिषेकः पाण्डवानाञ्च स्वर्गगमनं प्रतिपादयत ।

**प्रश्नः ११** **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ होतॄणां विपरीतसङ्कल्पेन का नाम कन्या बभूव ?
२ बुधः कं पुत्रमुत्पादयामास ?
३ सुकन्या कस्य पुत्र्यासीत् ?
४ महर्षिः च्यवनः कां कन्यामुपयेमे ?
५ हाहा-हूहू इति कस्य नामास्ति ?
६ कुशस्थली इदानीं केन नाम्ना ज्ञायते ?
७ द्वादशाब्दं यावत् जले को महर्षिः न्यवसत् ?
८ 'भोजनन्दनः' अर्थात् कः ?
९ 'निम्नगा' इत्यस्य कोऽर्थः ?
१० गोकुले वसतां बालघातिनी का ?
११ तालवने कः दैत्यराजः न्यवसत् ?
१२ 'विद्या' चतुष्टयम् का ?
१३ शक्रः कं नामानं मेघगणं वृष्ट्यर्थमब्रवीत् ?
१४ 'पाकशासनः' इत्यस्य कोऽर्थः ?
१५ विष्णुपुराणे कति अंशाः ?

****